International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 93-96
© 2021 IJSR
www.anantaajournal.com
Received: 15-10-2020
Accepted: 23-11-2020

**जगदीशमालः**
विशिष्टाचार्यः
रायगञ्जविश्वविद्यालयः
उत्तरदिनाजपुरम्, पश्चिमबङ्गः,
वेस्ट बेङ्गल, भारत

**Corresponding Author:**
**जगदीशमालः**
विशिष्टाचार्यः
रायगञ्जविश्वविद्यालयः
उत्तरदिनाजपुरम्, पश्चिमबङ्गः,
वेस्ट बेङ्गल, भारत

# विजयपर्वणि कवेः काव्यप्रतिभाविचारः

**जगदीशमालः**

**शोधसारः**
आधुनिकसंस्कृतसाहित्यजगति अभिराजराजेन्द्रमिश्रमहोदयः प्रख्यातः काव्यकारोऽस्ति। तस्य विविधासु रचनासु साम्प्रतिककालस्य वृत्तान्तं पौराणिकवृत्तान्तं लौकिकवृत्तान्तमितिहासाश्रितवृत्तान्तञ्च दरीदृश्यते। मिश्रमहाभागस्येतिहासाश्रितकाव्येषु विजयपर्व काव्यं महत्वपूर्णं स्थानं लभते। काव्यमिदं रचितं हिन्दीसाहित्यकारस्य रामकुमारवर्मामहाभागस्य हिन्दीभाषया विरचितं विजयपर्व नाटकमवलम्ब्य। इतिहासाश्रितं प्रसिद्धं कलिङ्गयुद्धस्य वृत्तान्तमाश्रित्य नाटकमिदं विनिर्मितम्। यद्यपि तत्र विजयपर्व नामके दृश्यकाव्ये कलिङ्गयुद्धेऽशोकस्य विजयसंवादस्य प्रतिफलनमस्ति तथापि तत्र नाटके ऐतिहासिकवृत्तान्तेन साकं काव्यकल्पनमपि विद्यते। तस्मादस्मिन्नाटके केन प्रकारेण कवेः काव्यप्रतिभा प्रतिफलिताऽस्तीति विषयमवलम्ब्य प्रस्तुतोऽयं शोधप्रबन्धः।

**मुख्यशब्दाः-** विजयपर्व, काव्यम्, काव्यत्त्वम्, काव्यफलम्, प्रतिभा, शैली।

**भूमिका-**
काव्यकाव्यशास्त्रयोर्मध्ये विशालं व्यवधानं विरोधोऽपि वर्तमानमस्ति। शास्त्रकारदृष्ट्या काव्यं सम्पूर्णतया निरर्थकमिति मन्यते। यस्मात् कवेर्रचनायां विविधकाले शास्त्रविरोधः धर्मसंकारणमिति च प्रमीयते। तथापि विश्वनाथकविराजः साहित्यदर्पणकारः काव्यकाव्यशास्त्रयोर्भेदप्रसङ्गे आलोचितवान्। काव्यस्वरुपनिर्णयविषये साहित्यदर्पणकारेण आचार्यविश्वनाथेनोक्तम् –

> "चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
> काव्यादेव यतस्तेन तत्स्वरुपं निरुप्यते"।।[1]

अर्थात् स्वल्पवुद्धिनां पाठकानां धर्मार्थकाममोक्षरुपं फलं काव्यपाठेनानायासेन प्राप्तिर्भवति। किन्तु काव्यशास्त्रभिन्नापरशास्त्रे न तदुपलभ्यते। साहित्यदर्पणकारेण विश्वनाथाचार्येण वेदशास्त्रं तिक्तौषधेन सह काव्यं शर्कराखण्डेन सह उपमितमिति। तस्मात् कारणात् एकोऽस्वस्थमानवः तिक्तमिष्टौषधयोर्मध्ये मधुररसयुक्तमौषधं याचति। तद्वत् तिक्तौषधितुल्यं वेदशास्त्रं तेऽल्पबुद्धिवालकाः परित्यज्य शर्करामिव काव्यमास्वादयन्ति। तेन हेतुना साहित्यदर्पणकारेणोक्तम् –

**"कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्"।**[2]

परन्तु धर्मसंकटस्य हेतुः शास्त्रविरोध इति प्रागुक्तम्। तद्धेतौ शास्त्रकारैः उक्तम् – 'काव्येन हन्यते शास्त्रम्'।

---

[1] साहित्यदर्पणः(प्रथमपरिच्छेदः), लोकमणिदाहाल, त्रिलोकीनाथ द्विवेदी, कारिका संख्याः-२, पत्राङ्कः-४

[2] तदेव-पत्राङ्कः-८

कविः तु सार्वभौमः मौलिकप्रतिभासम्पन्नः रसविस्तारकारी च। तद्काव्ये विविधस्य शास्त्रस्योदाहरणं प्राप्यते। न केवलं प्राचीनसाहित्ये एतद्धारा प्रवाहिता, अर्वाचीनसाहित्येऽपि एतादृशी वाक् विस्तृताऽस्ति। नाट्यशास्त्रकारेण भरतमुनिनोक्तम् –

"न तज् ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते"।।[3]

अर्थात् दृश्यकाव्ये शिल्प-विद्या-ज्ञान-कला-योगशास्त्राणां सम्मिलनं दृश्यते।

नाट्यशास्त्रस्य विचारधारा द्विविधा। प्रथमतया सा रचनाशैली। या नाट्यकारस्य प्रतिभाया अभिज्ञतायाश्च परिचायिका। द्वितीयतया अभिनयः। यत् नटनटीनां कृतित्वसापेक्षम्। साहित्यदर्पणे दशरूपके च ग्रन्थे नाट्यशास्त्रस्य विचारधारा दरीदृश्यते। अस्याः धारायाः मूलशास्त्रं तु भरतस्य नाट्यशास्त्रम्। साहित्यदर्पणे रूपकोरूपकानामालोचना कृता परन्तु नाटकस्य आलोचना अतीव व्यापकीभूता।

इदमपि वक्तुं शक्यते कालिदासस्य परवर्तीनि काले मल्लभूमिरूपेण परिचितं काव्यमिति। अनायासेन कवित्वेन सह पाण्डितस्य मिश्रणं कवित्वविचारस्य मानदण्डं परिचितम्। अभिराजराजेन्द्रमिश्रः अस्य युगस्य काव्यधारायां जायते स्म। तस्मात् तस्य काव्ये कवित्वपाण्डित्ययोर्संमिश्रणं परिलक्षितम् । अभिधानव्याकरणादिशास्त्रेषु पाण्डित्येन सह दर्शन-पुराण-नाट्यशास्त्र-नीतिशास्त्र-लिपिशास्त्रादिष्वपि तस्य पाण्डित्यस्य परिचयो विजयपर्वणि दृश्यकाव्ये प्राप्यते।

प्राचीनकालस्य पुरावृत्तान्तमैतिहासिकवृत्तान्तञ्च संगृह्य संस्कृतकाव्यं विनिर्मितं स्यात्। तद्रूपमैतिहासिकवृत्तान्तं लिपिवद्धमस्ति विजयपर्व इति दृश्यकाव्ये।

विजयपर्वदृश्यकाव्यस्य प्रथमाङ्के दृश्यते विन्दुसारस्य मृत्योरनन्तरं तस्य पुत्राः पाटलिपुत्रस्य योग्यशासकनिर्णये उद्योगिनोऽभवत्। यथा- "सुदत्तः तन्निमित्तं तु सागरादप्यधिकं जलं वर्ततेऽस्माकं जननीन् लोचनेषु। तस्मिन् सागरे साम्राज्यतरणी निमज्जितुं न शक्नोति अद्याऽस्माभिः पाटलिपुत्रस्य योग्यशासकः निर्णयनीय एव मया समेषां भ्रातृणां सहमतिरवाप्ता"। तदपि तेषां भ्रातरं राजाऽशोकं हत्वा अपरं भ्रातरं सुसीमं सिंहासनासीनं कर्तुमिच्छन्ति स्म। यद्वत् इदं वृत्तान्तं ज्ञायते तद्वत् भ्रातासुगामस्य कुटनीतिककौशलेन सिंहासनप्राप्त्यर्थं कलिङ्गराजेन नरेशेन सह वन्धुत्वं स्थापितवान्। द्वितीयाङ्के गुप्तचरस्य बुद्धिभद्रस्य मुखवचनात् सुगामनरेशयोर्मित्रतासंवादः अशोकं निकषा घोषितऽभवत्। यथा – "कलिङ्गनरेश इर्षतितरां मगधवैभवेभ्यः। तेन भारताद् बहिरपि उपनिवेशाः स्थपिता। स आत्मानं जम्वूद्वीपस्य मस्राजमवगच्छति अथ चास्मादेव मगधस्यैश्वर्यं तत्कृतेऽसह्यमस्ति। सम्राट् ! कलिङ्गनरेशः कुमारामात्यस्य सुगामस्य सहयोगी सञ्जातोऽस्ति। सहयोगमिममुपलक्ष्य च सैन्यसंघटनार्थं कुमारामात्येन उज्जयिन्या अनन्तो धनराशिरपि तस्मै समर्पितः"।

अस्य दृश्यकाव्यस्य तृतीयाङ्के दृश्यते मगधराज्यं स्वकरतलगतकरणाय सुगामेन सह कलिङ्गराजनरेश सन्धिवद्धोऽभवत्। सः कलिङ्गराजनरेशः तस्य चतुर्लक्षं वीरसैन्यं संग्रामे निधन्य दृष्ट्वा पराजयं स्वीकृत्य सम्राजमशोकं निकषा सन्धिपत्रं प्रेषितवान्। एतद्वृत्तान्तं सम्राजोऽशोकस्य मुखवचनात् उद्घोषितम्। -"यदा कलिङ्गनरेश ज्ञातवान् यच्चतुर्लक्षवीराः संग्रामे वलिमधिरूढास्तदाऽसाविदं सन्धिपत्रं प्रेषितवान्"।

यद्यपि नाट्यकारः ड. अभिराजराजेन्द्रमिश्रमहोदयः कलिङ्गयुद्धवृत्तान्तमाश्रित्य दृश्यकाव्यमिदं विरचितवान्। तस्मात् एतदनुमीयते यत् अस्मिन् दृश्यकाव्ये ऐतिहासिकज्ञानस्य प्रतिभायाश्च विकाशोऽभवत्।

पुनरपि अस्मिन् दृश्यकाव्ये ड. अभिराजराजेन्द्रमिश्रः अर्थशास्त्रादि शास्त्रानां गुरुत्वं स्वीकृतवान्। प्रथमाङ्के आर्यसुगामः ज्येष्ठभ्राता सुसीमस्य दैवीशक्तिविषये उक्तवान्- "आचार्यचाणक्यः स्वोपज्ञेऽर्थशास्त्रे सम्राजं दैवीशक्तिसंवलितं मनुते"। पुनः अमात्यखल्लाहकस्य वचनात् अर्थशास्त्रस्य प्रतिफलनं दृश्यते - "आचार्यचाणक्यस्यार्ऽथशास्त्रेण तु मार्गोऽस्माकं प्रशस्तो विहित एव"। एवं नीतिशास्त्रस्यापि तात्त्विकप्रतिफलनमत्र प्राप्यते। यथा- वयं सर्वे मिलित्वा एकस्योपरि आक्रमणं करिष्यामः? केयमेव राजनीतिः?। मिश्रमहोदयस्य कर्तव्याकर्तव्यारुपं शास्त्रज्ञानं सुदत्तस्य वचनात् प्रकाशितम्। राजनीतितत्त्वमत्र मूलरूपेण प्रतिफलितम्। अस्य दृश्यकाव्यकारस्य मिश्रमहोदयस्य लिपिशास्त्रज्ञानमपि आसीत्। सम्राजोऽशोकस्य मुख्यगिरिलेखगौणगिरिलेखविषये तस्यापि ज्ञानम् आसीत्। अस्य काव्यस्य तृतीयाङ्के राज्ञाऽशोकेनोक्तम् - "ममाऽदेशाः शिलालेखरूपेण लेखयित्वा,समस्तेऽपि जम्वूद्वीपे प्रचारणीया यदितोऽग्रेऽशोकोऽस्ति तद्रक्षकस्तदीयवन्धुः"। अतः शिलालेखविषये तस्य ज्ञानमतीव गभीरमासीदिति वक्तुं शक्यते।

तदपि विजयपर्व इति दृश्यकाव्ये चरित्रचित्रणं विषयोपस्थापनं प्रकृतिवर्णनं युद्धवृत्तान्तञ्च स्वशैला प्रकाशितम्। अस्मिन् दृश्यकाव्ये मुख्यचरित्ररूपेन अशोको विराजितः। अशोकस्य भ्रातरः अशोकं वहसि हत्वा ज्येष्ठभ्रातरं सुसीमं सिंहासनस्थ कर्तुमैच्छन्। आर्यसुगामेनोच्यते - "अद्यास्ति कृष्णपक्षस्य तृतीया! चन्द्रोदये ईषदेव विलम्वो भविष्यति। मद्याह्न एव गुप्तचरेभ्यः सूचना मयाऽवाप्ताऽसीद् यदस्य चन्द्रोदये सति अशोकः अमात्येन खल्लाहकेन सार्धं किञ्चिद् विशिष्टं मन्त्रयितुमस्मिन्नेव स्थाने समायास्यति। तस्मिन्नेव क्षणे वयं सम्भूय तान् आक्रमिष्यामः। अथ तेषां वधं करिष्यामः कारागारे वा तान् निक्षेप्स्यामः।"

अस्य काव्यस्य एकस्मिन् पार्श्वे यद्वत् अशोकस्य भ्रातरः खलाः दुष्टाः हिंसापरायनाः लोभातुरा इत्यादिरूपेन वर्णिताः तद्वत् सम्राजः अशोकस्य चरित्रे कर्तव्यपरायणता, रक्षकःधर्मिता आत्मसम्मानवोधः धर्माधर्मविचारक्षमता प्रजावात्सल्यता देशात्मवोधादि महत्गुणः अस्मिन् काव्ये चित्रितः। यथा- "पितृपादानां मरणानन्तरं मगधसाम्राज्यसुरक्षायाः प्रश्नो ममादिमं कर्तव्यम्। तत्पालनमहं जीवनस्य अन्तिमक्षणं यावत् विधास्ये"। पुनः -"प्रत्येकं खण्डं धरित्र्या मत्कृते सिंहासनम् "। तदपि राजाऽशोकः नारीजातिनां चरित्ररक्षणे अतीव कर्तव्यपरायणः आसीत्। द्वितीयाङ्के दृश्यते स्वयम्प्रभा शत्रुपक्षीयकलिङ्गदेशीया नारी। तथापि अशोकस्य समये मगधे काले कुटनीतिपरायणेन आर्येन सुगामेन अत्याचारिते सति अशोकं निकषा आश्रयं

---

[3] नाट्यशास्त्रम्, (प्रथमोऽध्यायः), केदारनाथसाहित्यभूषण, (सम्पादकः) श्लोकसंख्या-११६, पत्राङ्कः-१२

याचितवती। अशोकऽपि स्वयम्प्रभायाः रक्षणे यथोचितं कार्यं कृतवान् सुगामं दण्डविधानमपि दत्तवान् च। पुनरपि नाटकस्य तृतीयाङ्के अत्याचारिता अपरा नारी या क्रन्दनरता सा राजाशोकं निकषा न्यायविचारं प्रार्थितवती। युद्धे क्रन्दनरतायाः न्यार्याः क्षतविक्षतस्य शिशोः तस्याः पतेः मृत्युकारणात् न्यायविचारं याचितवती। राजा अशोकः यथार्थन्यायविचारार्थं विशेषव्यवस्थां गृहीतवान्। तत्र तृतीयाङ्कस्यान्तिमे शत्रुपक्षीयरसिभिः मृतप्रायं देहं गृहीत्वा चारुमित्रा अशोकस्य समीपे उपस्थिते सति अशोकनिधनं रुधितुं चारुमित्रा युद्धक्षेत्रे युद्धे नियोजितवती इति हेतौ अशोकः तद् विज्ञाय चारुमित्रायाः शुश्रुषायाः व्वस्थां कृतवान्। परवर्तिनि काले सर्वप्राणिं रक्षितुं प्रतिज्ञवद्धोऽपि अभवत्। यथा – "चारुमित्रे ! न त्वं मरिष्यसि। किञ्च, यदाऽहमाजीवनं प्राणिनां सुरक्षाया व्रतं गृहीतवानस्मि तदा त्वज्जीवनस्य सुरक्षायामहं निजां सकलामपि शक्तिं योजयिष्यामि मगधसाम्राज्यस्य चिकित्सकास्तव जीवनं रक्षिष्यन्ति। अथ चाऽखिलस्यापि जम्वूद्वीपस्य संघारामस्तव जीवनस्य मङ्गलं कामयिष्यन्ते "।

नृत्यगीतादौ अस्य दृश्यकाव्यकारस्य ड. अभिराजराजेन्द्रमिश्रमहोदयस्य प्रतिभा अकल्पनीया। अत्र तृतीयाङ्के नृत्यगीतविषयः सुस्पष्टरूपेण वर्णितः। कलिङ्गयुद्धस्य भयावहकालोऽयम्। कलिङ्गयुद्धस्य विभीषिकामयं वृत्तान्तं श्रुत्वा अशोकस्य पत्नी महादेवी नृत्यगीतादिना स्वात्ममनसन्तुष्टार्थं चारुमित्रां कथयति। तत्र महादेवी स्वयमेव स्वेन कण्ठेन गीतमाध्यमेन कथितवती –

"कलिकां परिचितवान् खलु भृङ्गः।
निजस्वरेण निर्मितः स्वर्गः
स्वर्गमेव कृतवान् खलु भृङ्गः।।
शनकैरवहन्मन्दो वातो भृत्वोरस्यनुरागम्
कलितनिकुञ्जे मौनकेतकं कुरुते जागरयागम्
कुसुमावल्यै को ददाति भो
विकसनसंवादः?
कलिकां परिचितवान् खलु भृङ्गः !!!"।

अतः अशोकपत्न्याः महादेव्याः कण्ठेनोद्भासितेन गीतेन काव्यकारः अभिराजराजेन्द्रमहोदयस्य सङ्गीतप्रतिभा विकशिता। तद्वत् चारुमित्रायाः युद्धकालीनपरिस्थितौ भैरवीनृत्यं विहाय रङ्गनृत्यवर्णनायां काव्यकारस्य नृत्यसम्वन्धीया प्रतिभा प्रकाशिता।

अस्मिन् काव्ये मिश्रमहाभागः उपमालङ्कारप्रयोगे व्यञ्जनाप्रयोगे च निपुणः आसीत्। प्रथमाङ्के दृश्यते सम्राजोऽशोकस्य भ्राता सुदत्तः आर्यसुगामं प्रति राजपदाभिषिक्तविषये कथितवान्। आर्यसुगामः स्वयं वर्षाकालस्य गगनेन सह राजलक्ष्मीसिंहासनञ्च वर्षाकालीयमेघवत् उपमितवान्। तस्मादुच्यते –

"सुदत्त ! यद्यहं सम्राट् भवितुमिच्छानि तर्हि न काऽपि शक्तिर्मां रोद्धुं प्रभविष्यति। वर्षाकाले मेघाः स्वयमेव नभसि समायान्ति, जलवृष्टिञ्च विदधति। न खल्वाकाशं मेघान् भिक्षां याचते। तथैवाऽहमपि राज्यश्रियो भिक्षां न याचिष्ये। स्वयमेष्यति मदन्तिकं राज्यलक्ष्मीः" ।

तृतीयाङ्के वर्णिता कलिङ्गयुद्धस्य परिस्थितेर्भयावहता। प्रलयरुपसंघर्षे कलिङ्गयुद्धे राजाशोकः स्वसैन्यानां शत्रुपक्षीयानां अवस्थानञ्च वर्णितवान्। अशोकस्य स्वसैन्याः जलतरङ्गस्येव। अपरपार्श्वे स्फुरितं यत् - "सेनायाः प्रत्येकं गुल्मो जललहरिसदृशोऽग्रेऽसरत्, शनैः शनैश्च दीर्घीभूय शत्रुखड्गैः सह प्रत्याघातं कुरुते स्म"। तदपि युद्धे अवतीर्णसैन्यं "सहस्रमिता धूमकेतवः"-इति रूपेण वर्णितम्। पुनरपि राजाशोकं शत्रुसैन्याः खड्गाघातेन आक्रमणकाले स्वः स्वं रक्षितवान्। स्वमस्तकं नागराजवासुकिनवत् उत्थिते सति आत्मरक्षितवान्। तृतीयाङ्के तद्वर्णितम्। यथा- "मामप्यभिलक्ष्य कश्चिदवीरः खड्गं सन्दधे। महानागेन वासुकिनेव मयाऽत्मशीर्षं वारितम्। तस्य खड्गो वायुमण्डले शुन्यचक्रीभूयाऽतिष्ठत्"।

इदं वक्तुं शक्यते यत् काव्यजिज्ञासाः वहुस्थानं स्वतःसिद्धनाट्यजिज्ञासायाः अधिकरणम्। "काव्येषु नाटकं रम्यम्" इति हेतौ नाटकं सर्वेषां समीपे प्रसिद्धं सर्वजनमनोऽभिरामञ्च। संस्कृतनाट्यानुशीलने नाट्यतत्त्वस्य क्षेत्रानुसन्धानं कियद्दुरं विस्तृतं दतपि चिन्तनीयम्। एतद् प्रसिद्धं यत् नाट्यकारः रसविषयं विज्ञाय चरित्रानुसारेण संलापनिर्मानं वाचिकादि-अभिनयम् आकारेङ्गितं नैःशव्दः विवादः विष्मयः हर्षः क्रोधः प्रसादनम् अनुकम्पादिनां प्रयोगे सहृदयदर्शकानां निमज्जयति आकर्षयति च। नाट्यकारः तथा अत्र दृश्यकाव्यकारः स्वीकृतवान् यत् दृश्यकाव्येन या लोकशिक्षा प्रदीयते तत् परमहंसरामकृष्णदेवेन कथितम्। तद्रुपं भरतमुनेः नाट्यशास्त्रग्रन्थेऽपि प्रतिफलितम् –

"धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद्भविष्यति"।।[4]

**उपसंहारः-**

अन्तिमे इदमुच्यते ड.अभिराजराजेन्द्रमिश्रमहोदयः प्रख्यातः साहित्यिकः आसीत्। तस्मादपि सः नाट्यकारकविरूपेन समधिकं प्रसिद्धमासीत्। सः ऐतिहासिक-सामाजिक नाट्यकानां स्वविनिर्मितं कौशलमाविस्कृतवान्। भारतीयेतिहासोपादानात् उपाख्यानं गृहीत्वा नाटकानि रचितवान्। तत्र नाटकेषु चरित्राणां यादृशी रुपरेखा विनिर्मिता यत् पाठकानां समृद्धमूल्यवोधस्य जागरणे सहायका भवति। एवञ्च समकालस्य समस्यायाः समाधानं कर्तुं शक्यते। तस्य नाटकानि भारतीय संस्कृतेः जातीयसम्वोधनस्य स्वरुपञ्च। अस्मात् आलोचनातः काव्यकारस्य ड. अभिराजराजेन्द्रमिश्रमहाभागस्य शास्त्रज्ञानस्य तथा कविप्रतिभायाः परिधिः न स्वल्पमासीत् एतद् अनुमीयते इति।

**ग्रन्थपञ्जी**

**मूलसंस्कृतग्रन्थः**

1. विजयपर्व, अभिराजराजेन्द्रमिश्रः, संस्कृतभारती, प्रथममुद्रणम्, नवदेहली, २०११

[4] नाट्यशास्त्रम्, (प्रथमोऽध्यायः), केदारनाथसाहित्यभूषण (सम्पादकः), श्लोकसंख्या-११५, पत्राङ्कः-१२

**सहायकग्रन्थाः**


1. कङ्गले, आर, पि, दि कौटिल्य अर्थशास्त्र (खण्ड. १, २), मोतिलाल वानारसीदास पाब्लिशार्स प्राइभेट् लिमिटेड, दिल्ली, ८म पुणर्मुद्रणम्, २०१४
2. दाहाल, लोकमणि, द्विवेदी, त्रिलोकीनाथ, साहित्यदर्पणः(१-६ अध्यायः), चौखम्वा सुरभारती प्रकाशन, वाराणसी, २०१७
3. पाण्डेय, उमेशचन्द्र, याज्ञवल्क्यस्मृतिः(व्यवहाराध्यायः), चौखम्वा संस्कृत संस्थान, वाराणसी, २०१४
4. भट्टाचार्य, हरिदाससिद्धान्तवागीश, महाभारतम्(शान्तिपर्व, ३४), विश्ववाणी प्रकाशनी, कलिकाता, २य संस्करणम्, १४०० (बङ्गाब्द)
5. भादुडी, सन्ध्या, रसगङ्गाधरः, संस्कृत पुस्तक भाण्डार, कलिकाता, १३९८ (बङ्गाब्द)
6. विद्यासागर, जीवनानन्द, नागानन्दम् , सुपारिन्टेनडेण्ट फ्रि संस्कृत कलेज, कलिकाता, २य संस्करणम्, १८८६